# Pranavopanishad 2

# પ્રણવોપનિષત્ ૨

## Document Information

Text title : praNavopaniShat 2

File name : praNavopaniShat2.itx

Category : upanishhat, vedanta, deities_misc

Location : doc_upanishhat

Proofread by : Sunder Hattangadi

Description-comments : aprakAshitA upaniShadaH

Latest update : October 18, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# Pranavopanishad 2

# પ્રણવોપનિષત્ ૨

બ્રહ્મ હ વૈ બ્રહ્માણં પુષ્કરે પુષ્કરે સસૃજે । સ ખલુ બ્રહ્મા
સૃષ્ટશ્ચિન્તામાપેદે । કેનાહમેકેનાક્ષરેણ સર્વાંશ્ચ કામાન્
સર્વાંશ્ચ લોકાન્ સર્વાંશ્ચ દેવાન્ સર્વાંશ્ચ વેદાન્ સર્વાંશ્ચ
યજ્ઞાન્ સર્વાંશ્ચ શબ્દાન્ સર્વાંશ્ચ વ્યુષ્ટીઃ સર્વાણિ ચ
ભૂતાનિ સ્થાવરજઙ્ગમાન્યનુભવેયમિતિ । સ બ્રહ્મચર્યમચરત્ ।
સ ઓમિત્યેતદક્ષરમપશ્યત્ । વિવર્ણં ચતુર્માત્રં સર્વવ્યાપિ
સર્વવિભ્વયાતયામબ્રહ્મ બ્રાહ્મીં વ્યાહૃતિં બ્રહ્મદૈવતં તથા
સર્વાંશ્ચ કામાન્ સર્વાંશ્ચ લોકાન્ સર્વાંશ્ચ દેવાન્ સર્વાંશ્ચ
વેદાન્ સર્વાંશ્ચ યજ્ઞાન્ સર્વાંશ્ચ શબ્દાન્ સર્વાંશ્ચ
વ્યુષ્ટીઃ સર્વાણિ ચ ભૂતાનિ સ્થાવરજઙ્ગમાન્યન્વભવત્ ।
તસ્ય પ્રથમેન વર્ણેનાપસ્નેહશ્ચાન્વભવત્ । તસ્ય
દ્વિતીયેન વર્ણેન તેજો જ્યોતીંષ્યન્વભવત્ । તસ્ય પ્રથમયા
સ્વરમાત્રયા પૃથિવીમગ્નિમોષધિવનસ્પતીનૃગ્વેદં ભૂરિતિ
વ્યાહૃતિર્ગાયત્રં છન્દસ્ત્રિવૃતં સ્તોમં પ્રાચીં દિશં
વસન્તમૃતું વાચમધ્યાત્મં જિહ્વાં રસમિતીન્દ્રિયાણ્યન્વભવત્ ।
તસ્ય દ્વિતીયયા સ્વરમાત્રયાન્તરિક્ષં વાયું યજુર્વેદં ભુવ ઇતિ
વ્યાહૃતિં ત્રૈષ્ટુભં છન્દઃ પઞ્ચદશં સ્તોમં પ્રતીચીં દિશં
ગ્રીષ્મમૃતું પ્રાણમધ્યાત્મં નાસિકે ગન્ધઘ્રાણમિતીન્દ્રિયાણ્યન્વભવત્ ।
તસ્ય તૃતીયયા સ્વરમાત્રયા દિવમાદિત્યં સામવેદં સ્વરિતિવ્યાહૃતિં
જાગતં છન્દઃ સપ્તદશં સ્તોમભુદીચીં દિશં વર્ષર્તું
જ્યોતિરધ્યાત્મં ચક્ષુષી દર્શનમિતીન્દ્રિયણયન્વભવત્ ।
તસ્ય વકારમાત્રયા યશ્ચન્દ્રમસમથર્વવેદં નક્ષત્રાણ્યોમિતિ
સ્વમાત્માનં જનદિત્યઙ્ગિરસામાનુષ્ટુભં છન્દઃ એકવિંશં
સ્તોમં દક્ષિણાં દિશં શરદમૃતું મનોઽધ્યાત્મં જ્ઞાનં
જ્ઞેયમિતીન્દ્રિયાણ્યન્વભવત્ । તસ્ય મકારશ્રુત્યેતિહાસપુરાણં

વાકોવાક્યગાથાનારાશંસીરુપનિષદોનુશાસમાનાનામિતિ
વૃધત્કરદ્ગુહન્મહત્તચ્છમોમિતિ વ્યાહૃતીઃ
સ્વરશમ્યનાનાતન્ત્રીસ્વરનૃત્યગીતવાદિત્રાણ્યન્વભવચ્ચૈત્રરથં
દૈવતં વૈદ્યુતં જ્યોતિર્બાર્હતં છન્દસ્તૃણવત્ત્રયસ્ત્રિંશસ્તોમૌ
ધ્રુવામૂર્ધ્વાં દિશં હેમન્તશિશિરાવૃતૂ શ્રોત્રમધ્યાત્મં
શબ્દશ્રવણમિતીન્દ્રિયાણ્યન્વભવત્ । સૈષૈકાક્ષર
ઋગ્બ્રહ્મણસ્તપસોઽગ્રે પ્રાદુર્બભૂવ । બ્રહ્મ વેદસ્યાથર્વણં
શુક્રમત એવ મન્ત્રાઃ પ્રાદુર્બભૂવુઃ । સ તુ ખલુ મન્ત્રાણાં તપસા
શુશ્રૂષાનધ્યાયાધ્યનેન યદૂનં ચ વરિષ્ઠં ચ યાતયામં
ચ કરોતિ । તથાપ્યથર્વણં તેજસા પ્રત્યાપ્યાયયેન્મન્ત્રાશ્ચ
મામભિમુખીભવેયુર્ગર્ભા ઇવ માતરમભિજિઘાંસુઃ
પરસ્તાદોઙ્કારપ્રયુક્તયૈતયૈવ તદૃચા પ્રત્યાપ્યાયયેદેષ
યજ્ઞસ્ય પુરસ્તાદ્યુજ્યત એષા પશ્ચાત્ સર્વત એતયા યજ્ઞસ્તપતે
તદપ્યેતદૃચોક્તં "યા પુરસ્તાદ્યુઝ્જત ઋચોઽક્ષરે
પરમે વ્યોમન્નિતિ" । તદેતદક્ષરં બ્રાહ્મણો યં કામમિચ્છેત્
ત્રિરાત્રોપોષિતઃ પ્રાઙ્મુખો વાગ્યતો બર્હિષ્યુપવિશ્ય સહસ્રં ઋચ
આવર્તયેત્ સિધ્યન્ત્યસ્યાર્થાઃ સર્વકર્માણિ ચેતિ બ્રાહ્મણમ્ ॥

વસોર્દ્વારાણામિન્દ્રનગરં તદસુરાઃ પર્યવારયન્ત । તે દેવા ભીતા
આસન્ । ક ઇમાનસુરાન્ હનિષ્યતીતિ । તમોઙ્કારં બ્રહ્મણઃ પુત્રં
જ્યેષ્ઠં દદૃશુસ્તે તમબ્રુવન્ । ભવતા મુખ્યેનેમાનસુરાન્ જયેમેતિ ।
સ હોવાચ કિં મે પ્રતીવાહો ભવિષ્યતીતિ । વરં વૃણીષ્વેતિ ।
વૃણ ઇતિ । સ વરમવૃણીત । "ન મામનીરયિત્વા બ્રાહ્મણા
બ્રહ્મ વદેયુર્યદિ વદેયુરબ્રહ્મ તત્સ્યાત્" ઇતિ । તથેતિ તે દેવા
દેવયજનસ્યોત્તરાર્ધેઽરૈઃ સંયત્તા આસંસ્તાનોઙ્કારેણાગ્નીધ્રીયા
દેવા અસુરાન્ પરાભાવયન્ત । તદ્યત્પરાભાવયન્ત તસ્માદોઙ્કારઃ
પૂર્વમુચ્ચાર્યતે । યો હ વા એતમોઙ્કારં ન વેદાવશ્યઃસ્યાદિત્યથ ય
એવં વેદ બ્રહ્મવશઃ સ્યાદિતિ તસ્માદોઙ્કાર ઋગ્ભવતિ યજુષિ યજુઃ
સામ્નિ સામ સૂત્રે સૂત્રં બ્રાહ્મણે બ્રાહ્મણં શ્લોકે શ્લોકઃ પ્રણવે પ્રણવ
ઇતિ બ્રાહ્મણમ્ ॥

ઓઙ્કારં પૃચ્છામઃ કો ધાતુઃ કિં પ્રાતિપદિકં કિં નામાખ્યાતં
કિં લિઙ્ગં કિં ચ વચનં કા વિભક્તિઃ કઃ પ્રત્યયઃ કઃ સ્વરઃ

ઉપસર્ગો નિપાતઃ કિં વૈ વ્યાકરણં કો વિકારઃ કો વિકારી કતિમાત્રઃ
કતિવર્ણઃ કત્યક્ષરઃ કતિપદઃ કઃ સંયોગઃ કિં સ્થાનાનુપ્રદાનકરણં
શિક્ષકાઃ કિમુચ્ચારયન્તિ કિં છન્દઃ કો વર્ણ ઇતિ પૂર્વે પ્રશ્નાઃ ।
અથોત્તરે મન્ત્રાઃ । કલ્પો બ્રાહ્મણં ઋગ્ યજુઃ સામ । કસ્માદ્બ્રહ્મવાદિન
ઓઙ્કારમાદિતઃ કુર્વન્તિ । કિં દૈવતં કિં જ્યોતિષં કિં નિરુક્તં કિં
સ્થાનં કા પ્રકૃતિઃ કિમધ્યાત્મમિતિ ષટ્ત્રિંશત્પ્રશ્નાઃ પૂર્વોત્તરાણાં
ત્રયો વર્ગા દ્વાદશ એકાશતૈરોઙ્કારં વ્યાખ્યાસ્યામઃ ॥

ઇન્દ્રઃ પ્રજાપતિમપૃચ્છત્ ભગવન્નભ્યસ્તૂય પૃચ્છામીતિ । પૃચ્છ
વત્સેત્યબ્રવીત્ । કિમયમોઙ્કારઃ કસ્ય પુત્રઃ કિં ચૈતચ્છન્દઃ કિં
ચૈતદ્વર્ણઃ કિં ચૈતદ્બ્રહ્મા બ્રહ્મ સમ્પદ્યતે । તસ્માદ્વૈતમોઙ્કારં
પૂર્વમાલોભસ્વરિતોદાત્ત એકાક્ષર ઓઙ્કાર ઋગ્વેદે ત્રૈસ્વર્યોદાત્ત
એકાક્ષર ઓઙ્કારો યજુર્વેદે દીર્ઘપ્લુતોદાત્ત એકાક્ષર ઓઙ્કારઃ સામવેદે
હ્રસ્વોદાત્ત એકાક્ષરઃ ઉકારોઽથર્વવેદેઽનુદાત્તોદાત્તદ્વિપદ અ ઉ
ઇત્યર્ધચતસ્રો માત્રા મકારે વ્યઞ્જનમિત્યાહુઃ । યા સા પ્રથમા
માત્રા બ્રહ્મદૈવત્યા રક્તા વર્ણેન યસ્તાં ધ્યાયતે નિત્યં સ
ગચ્છેદ્બ્રાહ્મં પદમ્ । યા સા દ્વિતીયા માત્રા વિષ્ણુદૈવત્યા કૃષ્ણા
વર્ણેન યસ્તાં ધ્યાયતે નિત્યં સ ગચ્છેદ્વૈષ્ણવં પદમ્ । યા સા
તૃતીયા માત્રા ઈશાનદૈવત્યા કપિલા વર્ણેન યસ્તાં ધ્યાયતે નિત્યં
સ ગચ્છેદૈશાનં પદમ્ । યા સાર્ધચતુર્થી માત્રા સર્વદૈવત્યા
વ્યક્તીભૂતા સ્વં વિચરતિ શુદ્ધસ્ફટિકસન્નિભા વર્ણેન યસ્તાં
ધ્યાયતે નિત્યં સ ગચ્છેત્ પદમનામકમ્ । ઓઙ્કારસ્યોત્પત્તિં વિપ્રો
યો ન જાનાતિ તત્પુનરુપનયનં તસ્માદ્બ્રાહ્મણવચનમાદર્તવ્યમ્ ।
યથા લાતવ્યો ગોત્રો બ્રાહ્મણઃ । પુત્રો ગાયત્રં છન્દઃ શુક્લો વર્ણઃ ।
પુંસો વત્સો રુદ્રો દેવતા । ઓઙ્કારો વેદાનાં ઉત્તરોપનિષદં
વ્યાખ્યાસ્યામઃ । કો ધાતુરિત્યાપ્ભેર્ધાતુરવતિમપ્યેકે ।
રૂપસામાન્યાદર્થસામાન્યાન્યન્યદીયસ્તસ્માદાપેરોઙ્કારઃ
સર્વમાપ્નોતીત્યર્થઃ । કૃદન્તમર્થવત્પ્રાતિપદિકમદર્શનં
પ્રત્યયસ્ય નામ સમ્પદ્યતે । નિપાતેષુ ચૈનં વૈય્યાકરણા ઉક્ષત્તં
સમામનન્તિ । તદવ્યયીભૂતમન્વર્થવાચી શબ્દો ન વ્યેતિ કદાચનેતિ ।
સદૃશં ત્રિષુ લિઙ્ગેષુ સર્વાસુ ચ વિભક્તિષુ । વચનેષુ ચ
સર્વેષુ યન્ન વ્યેતિ તદવ્યયમ્ ॥

કો વિકારી ચ્યવતે પ્રકારણમાપ્નોતિરાકારપકારૌ વિકાર્યૌ આદિતઃ
ઓકારો વિક્રિયતે । દ્વિતીયો મકાર એવં દ્વિવર્ણ એકાક્ષર ઓમિત્યોઙ્કારો
નિર્વૃત્તઃ । કતિમાત્ર ઇત્યાદેસ્તિસ્રો માત્રાઃ અભ્યાધાને હિ પ્લવતે ।
મકારશ્ચતુર્થી કિં સ્થાનમિત્યુભાવોષ્ઠૌ સ્થાનમાધાનકરણી ચ
દ્વિઃસ્થાનં સન્ધ્યક્ષરમવર્ણલેશઃ કણ્ઠ્યો યથોક્તશેષઃ પૂર્વો
વિવૃત્તકરણસ્થિતશ્ચ દ્વિતીયઃ સ્પૃષ્ટકરણસ્થિતશ્ચ । નાયં
યોગે વિદ્યુત આખ્યાતોપસર્ગાનુદાત્તઃ સ્વરિતલિઙ્ગવિભક્તિવચનાનિ ચ
સઞ્છિન્નાધ્યાયિન આચાર્યાઃ પૂર્વે બભૂબુઃ । શ્રવણાદેવં પ્રતિપદ્યન્તે ।
ન કારણં પ્રયચ્છન્ત્યથાપરપક્ષીયાણાં કવિઃ પઞ્ચાલચણ્ડઃ
પરિપૃચ્છકો બભૂવાંબુઃ પૃથગુદ્ગીથદોષાન્ ભવન્તો બ્રુવન્ત્વિતિ ।
તદ્વાચ્યુપલક્ષયેત્ વર્ણાક્ષરપદાઙ્કુશો વિભક્ત્યામૃષિનિષેવિતામિતિ
વાચં સ્તુવન્તિ । તસ્માત્ કારણં બ્રૂમો વર્ણાનામયમિદં ભવિષ્યતીતિ
ષડઙ્ગવિદસ્તત્તયાધીમહિ । કિં છન્દ ઇતિ । ગાયત્રં હિ છન્દો
ગાયત્રી દેવાનામેકાક્ષરા શ્વેતવર્ણા ચ વ્યાખ્યાતા । દ્વૌ દ્વાદશકૌ
વર્ગાવેતદ્વૈ વ્યાકરણં ધાત્વર્થવચનં શૈક્ષં છન્દો વચનં
ચાથોત્તરૌ દ્વૌ દ્વાદશકૌ વર્ગૌ વેદરહસિકી (?) વ્યાખ્યાતા
મન્ત્રકલ્પો બ્રાહ્મણમૃગ્યજુઃસામાથર્વાણ્યેષા વ્યાહૃતિશ્ચતુર્ણાં
વેદાનામાનુપૂર્વ્યેણ । ઓં ભૂર્ભુવસ્સુવરિતિ વ્યાહૃતયઃ ॥

અસમીક્ષ્ય પ્રવલ્હિતાનિ શ્રૂયન્તે દ્વાપરાદાવૃષીણામેકદેશો
દોષયતીહ ચિન્તામાપેદે । ત્રિભિઃ સોમઃ પાતવ્યઃ સમાપ્તમિવ
ભવતિ । તસ્માદૃગ્યજુસ્સામાન્યપક્રાન્તતેજાંસ્યાસંસ્તત્ર મહર્ષયઃ
પરિદેવયાઞ્ચક્રિર । મહચ્છોકભયં પ્રાપ્તાઃ સ્મો ન ચૈતસર્વૈઃ
સમભિહિતં તે વયં ભગવન્તમેવોપધાવામ । સર્વેષામેવ શર્મ
ભવાનિતિ । તે તથેત્યુક્ત્વા તૂષ્ણીમતિષ્ઠન્નાનુપસન્નેભ્ય
ઇત્યુપોપસીદામેતિ નીચૈર્બભૂબુઃ । સ એભ્ય ઉપનીય
પ્રોવાચ । મામિકામેવ વ્યાહૃતિમાદિતઃ કૃણુધ્વમિત્યેવં
મામકા અધીયન્તે । નર્ત્તે ભૃગ્વઙ્ગિરોવિદ્ભ્યઃ સોમઃ
પાતવ્ય ઋત્વિજઃ પરાભવન્તિ । યજમાનો રજસાપધ્વસ્યતિ
શ્રુતિશ્ચાપધ્વસ્તાપતિષ્ઠતીત્યેવમેવોત્તરોત્તરાદ્યોગાલ્લોકં
તોકં પ્રશાધ્વમિત્યેવં પ્રતાપો ન પરાભવિષ્યતીતિ । તથાહ
ભગવન્નિતિ પ્રતિપેદિરે આપ્યાયયંસ્તે તથા વીતશોકભયા બભૂવુઃ ।

તસ્માદ્બ્રહ્મવાદિન ઓઙ્કારમાદિતઃ કુર્વન્તિ ॥

કિં દૈવતમિત્યૃચામગ્નિર્દૈવતં તદેવ જ્યોતિર્ગાયત્રં છન્દઃ
પૃથિવી સ્થાનં “અગ્નિમીડે પુરોહિતં યજ્ઞસ્ય દેવમૃત્વિજમ્ ।
હોતારં રત્નધાતમમ્ ।” ઇત્યેવમાદિં કૃત્વા ઋગ્વેદમધીયતે ।
યજુષાં વાયુર્દૈવતં તદેવ જ્યોતિસ્ત્રૈષ્ટુભં છન્દોઽન્તરિક્ષં
સ્થાનં “ઇષે ત્વોર્જે ત્વા વાયવઃ સ્થોપાયવઃ સ્થ દેવો વઃ
સવિતા પ્રાર્પયતુ શ્રેષ્ઠતમાય કર્મણે” ઇત્યેવમાદિં કૃત્વા
યજુર્વેદમધીયતે । સામ્નાદિત્યો દૈવતં તદેવ જ્યોતિર્જાગતં છન્દો
દ્યૌઃ સ્થાનં “અગ્ન આયાહિ વીતયે ગૃણાનો હવ્યદાતયે । નિહોતા
સત્સિ બર્હિષિ ।” ઇત્યેવમાદિં કૃત્વા સામવેદમધીયતે ।
અથર્વણાં ચન્દ્રમા દૈવતં તદેવ જ્યોતિઃ સર્વાણિ છન્દાંસ્યાપઃ
સ્થાનં “શન્નો દેવીરભિષ્ટયે” ઇત્યેવમાદિં કૃત્વા
અથર્વવેદમધીયતે । અદ્ભ્યઃ સ્થાવરજઙ્ગમો ભૂતગ્રામઃ સમ્ભવતિ ।
તસ્માત્ સર્વમાપોમયં ભૂતં સર્વં ભૃગ્વઙ્ગિરોમયં અન્તરૈતે
ત્રયો વેદા ભૃગૂનઙ્ગિરસઃ શ્રિતા ઇત્યબિતિ પ્રકૃતિરપામોઙ્કારેણ
ચૈતસ્માદ્વ્યાસઃ ॥

ઇતિ પ્રણવોપનિષત્ (૨) સમાપ્તા ।

Proofread by Sunder Hattangadi

*Pranavopanishad 2*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*